# Tripurasundari Manasa Puja Stotra

# ત્રિપુરસુન્દરીમાનસપૂજાસ્તોત્રમ્

## Document Information

Text title : Tripurasundari Manasa Puja Stotra

File name : tripurasun.itx

Category : devii, dashamahAvidyA, stotra, shankarAchArya, devI

Location : doc_devii

Author : Adi Shankaracharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : A Hymn of worship to Goddess Tripurasundari

Latest update : April, 29, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 6, 2024

*sanskritdocuments.org*

# ત્રિપુરસુન્દરીમાનસપૂજાસ્તોત્રમ્

શ્રીઃ ।

મમ ન ભજનશક્તિઃ પાદયોસ્તે ન ભક્તિ-
    ર્ન ચ વિષયવિરક્તિર્ધ્યાનયોગે ન સક્તિઃ ।
ઇતિ મનસિ સદાહં ચિન્તયન્નાદ્યશક્તે
    રુચિરવચનપુષ્પૈરર્ચનં સંચિનોમિ ॥ ૧॥

વ્યાપ્તં હાટકવિગ્રહૈર્જલચરૈરારૂઢદેવવ્રજૈઃ
    પોતૈરાકુલિતાન્તરં મણિધરૈર્ભૂમીધરૈર્ભૂષિતમ્ ।
આરક્તામૃતસિન્ધુમુદ્ધુરચલદ્વીચીચયવ્યાકુલ-
    વ્યોમાનં પરિચિન્ત્ય સન્તતમહો ચેતઃ કૃતાર્થીભવ ॥ ૨॥

તસ્મિન્નુજ્જ્વલરત્નજાલવિલસત્કાન્તિચ્છટાભિઃ સ્ફુટં
    કુર્વાણં વિયદિન્દ્રચાપનિચયૈરાચ્છાદિતં સર્વતઃ ।
ઉચ્ચૈઃશૃઙ્ગનિષણ્ણદિવ્યવનિતાવૃન્દાનનપ્રોલ્લસ-
    દ્ગીતાકર્ણનનિશ્ચલાખિલમૃગં દ્વીપં નમસ્કુર્મહે ॥ ૩॥

જાતીચમ્પકપાટલાદિસુમનઃસૌરભ્યસમ્ભાવિતં
    હ્રીઙ્કારધ્વનિકણ્ઠકોકિલકુહૂપ્રોલ્લાસિચૂતદ્રુમમ્ ।
આવિર્ભૂતસુગન્ધિચન્દનવનં દૃષ્ટિપ્રિયં નન્દનં
ચઞ્ચચ્ચઞ્ચલચઞ્ચરિકચટુલં ચેતશ્ચિરં ચિન્તય ॥ ૪॥

પરિપતિતપરાગૈઃ પાટલક્ષોણિભાગો
    વિકસિતકુસુમોચ્ચૈઃ પીતચન્દ્રાર્કરશ્મિઃ ।
અલિશુકપિકરાજીકૂજિતૈઃ શ્રોત્રહારી
    સ્ફુરતુ હૃદિ મદીયે નૂનમુદ્યાનરાજઃ ॥ ૫॥

રમ્યદ્વારપુરપ્રચારતમસાં સંહારકારિપ્રભ
    સ્ફૂર્જત્તોરણભારહારકમહાવિસ્તારહારદ્યુતે ।
ક્ષોણીમણ્ડલહેમહારવિલસત્સંસારપારપ્રદ

પ્રોદ્યદ્ભક્તમનોવિહાર કનકપ્રાકાર તુભ્યં નમઃ ॥ ૬॥

ઉદ્યત્કાન્તિકલાપકલ્પિતનભઃસ્ફૂર્જદ્વિતાનપ્રભ
સત્કૃષ્ણાગરુધૂપવાસિતવિયત્કાષ્ઠાન્તરે વિશ્રુતઃ ।
સેવાયાતસમસ્તદૈવતગણૈરાસેવ્યમાનોઽનિશં
સોઽયં શ્રીમણિમણ્ડપોઽનવરતં મચ્ચેતસિ દ્યોતતામ્ ॥ ૭॥

ક્વાપિ પ્રોદ્ભટપદ્મરાગકિરણવ્રાતેન સન્ધ્યાયિતં
કુત્રાપિ સ્ફુટવિસ્ફુરન્મરકતદ્યુત્યા તમિસ્રાયિતમ્ ।
મધ્યાલમ્બિવિશાલમૌક્તિકરુચા જ્યોત્સ્નાયિતં કુત્રચિ-
ન્માતઃ શ્રીમણિમન્દિરં તવ સદા વન્દામહે સુન્દરમ્ ॥ ૮॥

ઉત્તુઙ્ગાલયવિસ્ફુરન્મરકતપ્રોદ્યત્પ્રભામણ્ડલા-
ન્યાલોક્યાઙ્કુરિતોત્સવૈર્નવતૃણાકીર્ણસ્થલીશઙ્કયા ।
નીતો વાજિભિરુત્પથં બત રથઃ સૂતેન તિગ્મદ્યુતે-
ર્વલ્ગાવલ્ગિગતહસ્તમસ્તશિખરં કષ્ટૈરિતઃ પ્રાપ્યતે ॥ ૯॥

મણિસદનસમુદ્યત્કાન્તિધારાનુરક્તે
વિયતિ ચરમસન્ધ્યાશઙ્કિનો ભાનુરથ્યાઃ ।
શિથિલિતગતકુપ્યત્સૂતહુઙ્કારનાદૈઃ
કથમપિ મણિગેહાદુચ્ચકૈરુચ્ચલન્તિ ॥ ૧૦॥

ભક્ત્યા કિં નુ સમર્પિતાનિ બહુધા રત્નાનિ પાથોધિના
કિં વા રોહણપર્વતેન સદનં યૈર્વિશ્વકર્માકરોત્ ।
આ જ્ઞાતં ગિરિજે કટાક્ષકલયા નૂનં ત્વયા તોષિતે
શમ્ભૌ નૃત્યતિ નાગરાજફણિના કીર્ણા મણિશ્રેણયઃ ॥ ૧૧॥ વિદૂરમુક્તવાહનૈર્વિનમ્રમૌલિમણ્ડલૈ-
ર્નિબદ્ધહસ્તસમ્પુટૈઃ પ્રયત્નસંયતેન્દ્રિયૈઃ ।
વિરિઞ્ચિવિષ્ણુશઙ્કરાદિભિર્મુદા તવામ્બિકે
પ્રતીક્ષ્યમાણનિર્ગમો વિભાતિ રત્નમણ્ડપઃ ॥ ૧૨॥

ધ્વનન્મૃદઙ્ગકાહલઃ પ્રગીતકિંનરીગણઃ
પ્રનૃત્તદિવ્યકન્યકઃ પ્રવૃત્તમઙ્ગલક્રમઃ ।
પ્રકૃષ્ટસેવકવ્રજઃ પ્રહૃષ્ટભક્તમણ્ડલો
મુદે મમાસ્તુ સન્તતં ત્વદીયરત્નમણ્ડપઃ ॥ ૧૩॥

પ્રવેશનિર્ગમાકુલૈઃ સ્વકૃત્યરક્તમાનસૈ-
ર્બહિસ્થિતામરાવલીવિધીયમાનભક્તિભિઃ ।

વિચિત્રવસ્ત્રભૂષણૈરુપેતમઙ્ગનાજનૈઃ
સદા કરોતુ મઙ્ગલં મમેહ રત્નમણ્ડપઃ ॥ ૧૪॥

સુવર્ણરત્નભૂષિતૈર્વિચિત્રવસ્ત્રધારિભિ-
ર્ગૃહીતહેમયષ્ટિભિર્નિરુદ્ધસર્વદૈવતૈઃ ।
અસંખ્યસુન્દરીજનૈઃ પુરસ્થિતૈરધિષ્ઠિતો
મદીયમેતુ માનસં ત્વદીયતુઙ્ગતોરણઃ ॥ ૧૫॥

ઇન્દ્રાદીંશ્ચ દિગીશ્વરાન્સહપરિવારાનથો સાયુધા-
ન્યોષિદ્રૂપધરાન્સ્વદિક્ષુ નિહિતાન્સંચિન્ત્ય હૃત્પઙ્કજે ।
શઙ્ખે શ્રીવસુધારયા વસુમતીયુક્તં ચ પદ્મં સ્મર-
ન્કામં નૌમિ રતિપ્રિયં સહચરં પ્રીત્યા વસન્તં ભજે ॥ ૧૬॥

ગાયન્તીઃ કલવીણયાતિમધુરં હુઙ્કારમાતન્વતી-
ર્દ્વારાભ્યાસકૃતસ્થિતીરિહ સરસ્વત્યાદિકાઃ પૂજયન્ ।
દ્વારે નૌમિ મદોન્મદં સુરગણાધીશં મદેનોન્મદાં
માતઙ્ગીમસિતામ્બરાં પરિલસન્મુક્તાવિભૂષાં ભજે ॥ ૧૭॥

કસ્તૂરિકાશ્યામલકોમલાઙ્ગીં
કાદમ્બરીપાનમદાલસાઙ્ગીમ્ ।
વામસ્તનાલિઙ્ગિતરત્નવીણાં
માતઙ્ગકન્યાં મનસા સ્મરામિ ॥ ૧૮॥

વિકીર્ણચિકુરોત્કરે વિગલિતામ્બરાડમ્બરે
મદાકુલિતલોચને વિમલભૂષણોદ્ભાસિનિ ।
તિરસ્કરિણિ તાવકં ચરણપઙ્કજં ચિન્તય-
ન્કરોમિ પશુમણ્ડલીમલિકમોહદુગ્ધાશયામ્ ॥ ૧૯॥

પ્રમત્તવારુણીરસૈર્વિઘૂર્ણમાનલોચનાઃ
પ્રચણ્ડદૈત્યસૂદનાઃ પ્રવિષ્ટભક્તમાનસાઃ ।
ઉપોઢકજ્જલચ્છવિચ્છટાવિરાજિવિગ્રહઃ
કપાલશૂલધારિણીઃ સ્તુવે ત્વદીયદૂતિકાઃ ॥ ૨૦॥

સ્ફૂર્જન્નવ્યયવાઙ્કુરોપલસિતાભોગૈઃ પુરઃ સ્થાપિતૈ-
ર્દીપોદ્ભાસિશરાવશોભિતમુખૈઃ કુમ્ભૈર્નવૈઃ શોભિના ।
સ્વર્ણાબદ્ધવિચિત્રરત્નપટલીચઞ્ચત્કપાટશ્રિયા
યુક્તં દ્વારચતુષ્ટયેન ગિરિજે વન્દે મણી મન્દિરમ્ ॥ ૨૧॥

આસ્તીર્ણારુણકમ્બલાસનયુતં પુષ્પોપહારાન્વિતં
દીપ્તાનેકમણિપ્રદીપસુભગં રાજદ્વિતાનોત્તમમ્ ।
ધૂપોદ્ગારિસુગન્ધિસમ્ભ્રમમિલદ્ભૃઙ્ગાવલીગુઞ્જિતં
કલ્યાણં વિતનોતુ મેઽનવરતં શ્રીમણ્ડપાભ્યન્તરમ્ ॥ ૨૨॥

કનકરચિતે પઞ્ચપ્રેતાસનેન વિરાજિતે
મણિગણચિતે રક્તશ્વેતામ્બરાસ્તરણોત્તમે ।
કુસુમસુરભૌ તલ્પે દિવ્યોપધાનસુખાવહે
હૃદયકમલે પ્રાદુર્ભૂતાં ભજે પરદેવતામ્ ॥ ૨૩॥

સર્વાઙ્ગસ્થિતિરમ્યરૂપરુચિરાં પ્રાતઃ સમભ્યુત્થિતાં
જૃમ્ભામઞ્જુમુખામ્બુજાં મધુમદવ્યાઘૂર્ણદક્ષિત્રયામ્ ।
સેવાયાતસમસ્તસંનિધિસખીઃ સંમાનયન્તીં દૃશા
સમ્પશ્યન્પરદેવતાં પરમહો મન્યે કૃતાર્થં જનુઃ ॥ ૨૪॥

ઉચ્ચૈસ્તોરણવર્તિવાદ્યનિવહધ્વાને સમુજ્જૃમ્ભિતે
ભક્તૈર્ભૂમિવિલગ્નમૌલિભિરલં દણ્ડપ્રણામે કૃતે ।
નાનારત્નસમૂહનદ્ધકથનસ્થાલીસમુદ્ભાસિતાં
પ્રાતસ્તે પરિકલ્પયામિ ગિરિજે નીરાજનામુજ્જ્વલામ્ ॥ ૨૫॥

પાદ્યં તે પરિકલ્પયામિ પદયોરર્ઘ્યં તથા હસ્તયોઃ
સૌધીભિર્મધુપર્કમમ્બ મધુરં ધારાભિરાસ્વાદય ।
તોયેનાચમનં વિધેહિ શુચિના ગાઙ્ગેન મત્કલ્પિતં
સાષ્ટાઙ્ગં પ્રણિપાતમીશદયિતે દૃષ્ટ્યા કૃતાર્થી કુરુ ॥ ૨૬॥

માતઃ પશ્ય મુખામ્બુજં સુવિમલે દત્તે મયા દર્પણે
દેવિ સ્વીકુરુ દન્તધાવનમિદં ગઙ્ગાજલેનાન્વિતમ્ ।
સુપ્રક્ષાલિતમાનનં વિરચયન્સ્નિગ્ધામ્બરપ્રોઞ્છનં
દ્રાગઙ્ગીકુરુ તત્ત્વમમ્બ મધુરં તામ્બૂલમાસ્વાદય ॥ ૨૭॥

નિધેહિ મણિપાદુકોપરિ પદામ્બુજં મજ્જના-
લયં વ્રજ શનૈઃ સખીકૃતકરામ્બુજાલમ્બનમ્ ।
મહેશિ કરુણાનિધે તવ દૃગન્તપાતોત્સુકા-
ન્વિલોકય મનાગમૂનુભયસંસ્થિતાન્દૈવતાન્ ॥ ૨૮॥

હેમરત્નવરણેન વેષ્ટિતં

વિસ્તૃતારુણવિતાનશોભિતમ્ ।
સજ્જસર્વપરિચારિકાજનં
પશ્ય મજ્જનગૃહં મનો મમ ॥ ૨૯॥

કનકકલશજાલસ્ફાટિકસ્નાનપીઠા-
દ્યુપકરણવિશાલં ગન્ધમત્તાલિમાલમ્ ।
સ્ફુરદરુણવિતાં મઞ્જુગન્ધર્વગાનં
પરમશિવમહેલે મજ્જનાગારમેહિ ॥ ૩૦॥

પીનોત્તુઙ્ગપયોધરાઃ પરિલસત્સમ્પૂર્ણચન્દ્રાનના
રત્નસ્વર્ણવિનિર્મિતાઃ પરિલસત્સૂક્ષ્મામ્બરપ્રાવૃતાઃ ।
હેમસ્નાનઘટીસ્તથા મૃદુપટિરુદ્વર્તનં કૌસુમં
તૈલં કઙ્કતિકં કરેષુ દધતીર્વન્દેઽમ્બ તે દાસિકાઃ ॥ ૩૧॥

તત્ર સ્ફાટિકપીઠમેત્ય શનકૈરુત્તારિતાલઙ્કૃતિ-
ર્નીચૈરુજ્ઝિતકઞ્ચુકોપરિહિતારક્તોત્તરીયામ્બરા ।
વેણીબન્ધમપાસ્ય કઙ્કતિકયા કેશપ્રસાદં મના-
ક્કુર્વાણા પરદેવતા ભગવતી ચિત્તે મમ દ્યોતતામ્ ॥ ૩૨॥

અભ્યઙ્ગં ગિરિજે ગૃહાણ મૃદુના તૈલેન સમ્પાદિતં
કાશ્મીરૈરગરુદ્રવૈર્મલયજૈરુદ્વર્તનં કારય ।
ગીતે કિંનરકામિનીભિરભિતો વાદ્યે મુદા વાદિતે
નૃત્યન્તીમિહ પશ્ય દેવિ પુરતો દિવ્યાઙ્ગનામણ્ડલીમ્ ॥ ૩૩॥

કૃતપરિકરબન્ધાસ્તુઙ્ગપીનસ્તનાઢ્યા
મણિનિવહનિબદ્ધા હેમકુમ્ભીર્દધાનાઃ ।
સુરભિસલિલનિર્યદ્ગન્ધલુબ્ધાલિમાલાઃ
સવિનયમુપતસ્થુઃ સર્વતઃ સ્નાનદાસ્યઃ ॥ ૩૪॥

ઉદ્ગન્ધૈરગરુદ્રવૈઃ સુરભિણા કસ્તૂરિકાવારિણા
સ્ફૂર્જત્સૌરભયક્ષકર્દમજલૈઃ કાશ્મીરનીરૈરપિ ।
પુષ્પામ્ભોભિરશેષતીર્થસલિલૈઃ કર્પૂરપાથોભરૈઃ
સ્નાનં તે પરિકલ્પયામિ ગિરિજે ભક્ત્યા તદઙ્ગીકુરુ ॥ ૩૫॥

પ્રત્યઙ્ગં પરિમાર્જયામિ શુચિના વસ્ત્રેણ સમ્પ્રોઞ્છનં
કુર્વે કેશકલાપમાયતતરં ધૂપોત્તમૈર્ધૂપિતમ્ ।
આલીવૃન્દવિનિર્મિતાં યવનિકામાસ્થાપ્યરત્નપ્રભં

भक्तत्राणपरे મહેશગૃહિણિ સ્નાનામ્બરં મુચ્યતામ્ ॥ ૩૬॥

પીતં તે પરિકલ્પયામિ નિબિડં ચણ્ડાતકં ચણ્ડિકે
સૂક્ષ્મં સ્નિગ્ધમુરીકુરુષ્વ વસનં સિન્દૂરપૂરપ્રભમ્ ।
મુક્તારત્નવિચિત્રહેમરચનાચારુપ્રભાભાસ્વરં
નીલં કઞ્ચુકમર્પયામિ ગિરિશપ્રાણપ્રિયે સુન્દરિ ॥ ૩૭॥

વિલુલિતચિકુરેણ ચ્છાદિતાંસપ્રદેશે
મણિનિકરવિરાજત્પાદુકાન્યસ્તપાદે ।
સુલલિતમવલમ્બ્ય દ્રાક્સખીમંસદેશે
ગિરિશગૃહિણિ ભૂષામણ્ટપાય પ્રયાહિ ॥ ૩૮॥

લસત્કનકકુટ્ટિમસ્ફુરદમન્દમુક્તાવલી-
સમુલ્લસિતકાન્તિભિઃ કલિતશક્રચાપવ્રજે ।
મહાભરણમણ્ડપે નિહિતહેમસિંહાસનં
સખીજનસમાવૃતં સમધિતિષ્ઠ કાત્યાયનિ ॥ ૩૯॥

સ્નિગ્ધં કઙ્કતિકામુખેન શનકૈઃ સંશોધ્ય કેશોત્કરં
સીમન્તં વિરચય્ય ચારુ વિમલં સિન્દૂરરેખાન્વિતમ્ ।
મુક્તાભિર્ગ્રથિતાલકાં મણિચિતૈઃ સૌવર્ણસૂત્રૈઃ સ્ફુટં
પ્રાન્તે મૌક્તિકગુચ્છકોપલતિકાં ગ્રથ્નામિ વેણીમિમામ્ ॥ ૪૦॥

વિલમ્બિવેણીભુજગોત્તમાઙ્ગ-
સ્ફુરન્મણિભ્રાન્તિમુપાનયન્તમ્ ।
સ્વરોચિષોલ્લાસિતકેશપાશં
મહેશિ ચૂડામણિમર્પયામિ ॥ ૪૧॥

ત્વામાશ્રયદ્ભિઃ કબરીતમિસ્રૈ-
ર્બન્દીકૃતં દ્રાગિવ ભાનુબિમ્બમ્ ।
મૃડાનિ ચૂડામણિમાદધાનં
વન્દામહે તાવતમુત્તમાઙ્ગમ્ ॥ ૪૨॥

સ્વમધ્યનદ્ધહાટકસ્ફુરન્મણિપ્રભાકુલં
વિલમ્બિમૌક્તિકચ્છટાવિરાજિતં સમન્તતઃ ।
નિબદ્ધલક્ષચક્ષુષા ભવેન ભૂરિ ભાવિતં
સમર્પયામિ ભાસ્વરં ભવાનિ ફાલભૂષણમ્ ॥ ૪૩॥

મીનામ્ભોરુહખઞ્જરીટસુષમાવિસ્તારવિસ્મારકે
કુર્વાણે કિલ કામવૈરિમનસઃ કન્દર્પબાણપ્રભામ્ ।
માધ્વીપાનમદારુણેઽતિચપલે દીર્ઘે દૃગમ્ભોરુહે
દેવિ સ્વર્ણશલાકયોર્જિતમિદં દિવ્યાઞ્જનં દીયતામ્ ॥ ૪૪॥

મધ્યસ્થારુણરત્નકાન્તિરુચિરાં મુક્તામુગોદ્ભાસિતાં
દૈવાદ્ભાર્ગવજીવમધ્યગરવેર્લક્ષ્મીમધઃ કુર્વતીમ્ ।
ઉત્સિક્તાધરબિમ્બકાન્તિવિસરૈર્ભૌમીભવન્મૌક્તિકાં
મદ્દત્તમુરરીકુરુષ્વ ગિરિજે નાસાવિભૂષામિમામ્ ॥ ૪૫॥

ઉડુકૃતપરિવેષસ્પર્ધયા શીતભાનો-
રિવ વિરચિતદેહદ્વન્દ્વમાદિત્યબિમ્બમ્ ।
અરુણમણિસમુદ્યત્પ્રાન્તવિભ્રાજિમુક્તં
શ્રવસિ પરિનિધેહિ સ્વર્ણતાટઙ્કયુગ્મમ્ ॥ ૪૬॥

મરકતવરપદ્મરાગહીરો-
ત્થિતગુલિકાત્રિતયાવનદ્ધમધ્યમ્ ।
વિતતવિમલમૌક્તિકં ચ
કણ્ઠાભરણમિદં ગિરિજે સમર્પયામિ ॥ ૪૭॥

નાનાદેશસમુત્થિતૈર્મણિગણપ્રોદ્યત્પ્રભામણ્ડલ-
વ્યાપ્તૈરાભરણૈર્વિરાજિતગલાં મુક્તાચ્છટાલઙ્કૃતામ્ ।
મધ્યસ્થારુણરત્નકાન્તિરુચિરાં પ્રાન્તસ્થમુક્તાફલ-
વ્રાતામમ્બ ચતુષ્કિકાં પરશિવે વક્ષઃસ્થલે સ્થાપય ॥ ૪૮॥

અન્યોન્યં પ્લાવયન્તી સતતપરિચલત્કાન્તિકલ્લોલજાલૈઃ
કુર્વાણા મજ્જદન્તઃકરણવિમલતાં શોભિતેવ ત્રિવેણી ।
મુક્તાભિઃ પદ્મરાગૈર્મરકતમણિભિર્નિર્મિતા દીપ્યમાનૈ-
ર્નિત્યં હારત્રયી તે પરશિવરસિકે ચેતસિ દ્યોતતાં નઃ ॥ ૪૯॥

કરસરસિજનાલે વિસ્ફુરત્કાન્તિજાલે
વિલસદમલશોભે ચઞ્ચદીશાક્ષિલોભે ।
વિવિધમણિમયૂખોદ્ભાસિતં દેવિ દુર્ગે
કનકકટકયુગ્મં બાહુયુગ્મે નિધેહિ ॥ ૫૦॥

વ્યાલમ્બમાનસિતપટ્ટકગુચ્છશોભિ
સ્ફૂર્જન્મણીઘટિતહારવિરોચમાનમ્ ।

માતર્મહેશમહિલે તવ બાહુમૂલે
    કેયૂરકદ્વયમિદં વિનિવેશયામિ ॥ ૫૧॥

વિતતનિજમયૂખૈર્નિર્મિતામિન્દ્રનીલૈ-
    ર્વિજિતકમલનાલાલીનમત્તાલિમાલામ્ ।
મણિગણખચિતાભ્યાં કઙ્કણાભ્યામુપેતાં
    કલય વલયરાજીં હસ્તમૂલે મહેશિ ॥ ૫૨॥

નીલપટ્ટમૃદુગુચ્છશોભિતા-
    બદ્ધનૈકમણિજાલમઞ્જુલામ્ ।
અર્પયામિ વલયાત્પુરઃસરે
    વિસ્ફુરત્કનકતૈતૃપાલિકામ્ ॥ ૫૩॥

આલવાલમિવ પુષ્પધન્વના
    બાલવિદ્રુમલતાસુ નિર્મિતમ્ ।
અઙ્ગુલીશુ વિનિધીયતાં શનૈ-
    રઙ્ગુલીયકમિદં મદર્પિતમ્ ॥ ૫૪॥

વિજિતહરમનોભૂમત્તમાતઙ્ગકુમ્ભ-
    સ્થલવિલુલિતકૂજત્કિઙ્કિણીજાલતુલ્યામ્ ।
અવિરતકલનદૈરીશચેતો હરન્તીં
    વિવિધમણિનિબદ્ધાં મેખલામર્પયામિ ॥ ૫૫॥

વ્યાલમ્બમાનવરમૌક્તિકગુચ્છશોભિ
    વિભ્રાજિહાટકપુટદ્વયરોચમાનમ્ ।
હેમ્ના વિનિર્મિતમનેકમણિપ્રબન્ધં
    નીવીનિબન્ધનગુણં વિનિવેદયામિ ॥ ૫૬॥

વિનિહતનવલાક્ષાપઙ્કબાલાતપૌઘે
    મરકતમણિરાજીમઞ્જુમઞ્જીરઘોષે ।
અરુણમણિસમુદ્યત્કાન્તિધારાવિચિત્ર-
    સ્તવ ચરણસરોજે હંસકઃ પ્રીતિમેતુ ॥ ૫૭॥

નિબદ્ધશિતિપટ્ટકપ્રવરગુચ્છસંશોભિતાં
    કલક્વણિતમઞ્જુલાં ગિરિશચિત્તસંમોહનીમ્ ।
અમન્દમણિમણ્ડલીવિમલકાન્તિકિમ્મીરિતાં
    નિધેહિ પદપઙ્કજે કનકઘુઙ્ઘુરૂમમ્બિકે ॥ ૫૮॥

વિસ્ફુરત્સહજરાગરઞ્જિતે
    શિઞ્જિતેન કલિતાં સખીજનૈઃ ।
પદ્મરાગમણિનૂપુરદ્વયી-
    મર્પયામિ તવ પાદપઙ્કજે ॥ ૫૯॥

પદામ્બુજમુપાસિતું પરિગતેન શીતાંશુના
    કૃતાં તનુપરમ્પરામિવ દિનાન્તરાગારુણામ્ ।
મહેશિ નવયાવકદ્રવભરેણ શોણીકૃતાં
    નમામિ નખમણ્ડલીં ચરણપઙ્કજસ્થાં તવ ॥ ૬૦॥

આરક્તશ્વેતપીતસ્ફુરદુરુકસુમૈશ્ચિત્રિતાં પટ્ટસૂત્રૈ-
    ર્દેવસ્ત્રીભિઃ પ્રયત્નાદગરુસમુદિતૈર્ધૂપિતાં દિવ્યધૂપૈઃ ।
ઉદ્યદ્ગન્ધાન્ધપુષ્પંધયનિવહસમારબ્ધઝાઙ્કારગીતાં
    ચઞ્ચત્કહ્લારમાલાં પરશિવરસિકે કણ્ઠપીઠેઽર્પયામિ ॥ ૬૧॥

ગૃહાણ પરમામૃતં કનકપાત્રસંસ્થાપિતં
    સમર્પય મુખામ્બુજે વિમલવીટિકામમ્બિકે ।
વિલોકય મુખામ્બુજં મુકુરમણ્ડલે નિર્મલે
    નિધેહિ મણિપાદુકોપરિ પદામ્બુજં સુન્દરિ ॥ ૬૨॥

આલમ્બ્ય સ્વસખીં કરેણ શનકૈઃ સિંહાસનાદુત્થિતા
    કૂજન્મન્દમરાલમઞ્જુલગતિપ્રોલ્લાસિભૂષામ્બર ।
આનન્દપ્રતિપાદકૈરુપનિષદ્વાક્યૈઃ સ્તુતા વેધસા
    મચ્ચિત્તે સ્થિરતામુપૈતુ ગિરિજા યાન્તી સભામણ્ડપમ્ ॥ ૬૩॥

ચલન્ત્યામમ્બાયાં પ્રચલતિ સમસ્તે પરિજને
    સવેગં સંયાતે કનકલતિકાલઙ્કૃતિભરે ।
સમતાદુત્તાલસ્ફુરિતપદસમ્પાતજનિતૈ-
    ર્ઝણત્કારૈસ્તારૈર્ઝણઝણિતમાસીન્મણિગૃહમ્ ॥ ૬૪॥

ચઞ્ચદ્વેત્રકરાભિરઙ્ગવિલસદ્ભૂષામ્બરાભિઃ પુરો-
    યન્તીભિઃ પરિચારિકાભિરમરવ્રાતે સમુત્સારિતે ।
રુદ્ધે નિર્જરસુન્દરીભિરભિતઃ કક્ષાન્તરે નિર્ગતં
    વન્દે નન્દિતશમ્ભુ નિર્મલચિદાનન્દૈકરૂપં મહઃ ॥ ૬૫॥

વેધાઃ પાદતલે પતત્યયમસૌ વિષ્ણુર્નમત્યગ્રતઃ

શમ્ભુર્દેહિ દૃગઞ્ચલં સુરપતિં દૂરસ્થમાલોકય ।
ઇત્યેવં પરિચારિકાભિરુદિતે સંમાનનાં કુર્વતી
દૃગ્દ્વન્દ્વેન યથોચિતં ભગવતી ભૂયાદ્વિભૂત્યૈ મમ ॥ ૬૬॥

મન્દં ચારણસુન્દરીભિરભિતો યાન્તીભિરુત્કણ્ઠયા
નામોચ્ચારણપૂર્વકં પ્રતિદિશં પ્રત્યેકમાવેદિતાત્ ।
વેગાદક્ષિપથં ગતાન્સુરગણાનાલોકયન્તી શનૈ-
ર્દિત્સન્તી ચરણામ્બુજં પથિ જગત્પાયાન્મહેશપ્રિયા ॥ ૬૭॥

અગ્રે કેચન પાર્શ્વયોઃ કતિપયે પૃષ્ઠે પરે પ્રસ્થિતા
આકાશે સમવસ્થિતાઃ કતિપયે દિક્ષુ સ્થિતાશ્ચાપરે ।
સંમર્દં શનકૈરપાસ્ય પુરતો દણ્ડપ્રણામાન્મુહુઃ
કુર્વાણાઃ કતિચિત્સુરા ગિરિસુતે દૃક્પાતમિચ્છન્તિ તે ॥ ૬૮॥

અગ્રે ગાયતિ કિંનરી કલપદં ગન્ધર્વકાન્તાઃ શનૈ-
રાતોદ્યાનિ ચ વાદયન્તિ મધુરં સવ્યાપસવ્યસ્થિતાઃ ।
કૂજન્નૂપુરનાદ મઞ્જુ પુરતો નૃત્યન્તિ દિવ્યાઙ્ગના
ગચ્છન્તઃ પરિતઃ સ્તુવન્તિ નિગમસ્તુત્યા વિરિઞ્ચ્યાદયઃ ॥ ૬૯॥

કસ્મૈચિત્સુચિરાદુપાસિતમહામન્ત્રૌઘસિદ્ધિં ક્રમા-
દેકસ્મૈ ભવનિઃસ્પૃહાય પરમાનન્દસ્વરૂપાં ગતિમ્ ।
અન્યસ્મૈ વિષયાનુરક્તમનસે દીનાય દુઃખાપહં
દ્રવ્યં દ્વારસમાશ્રિતાય દદતીં વન્દામહે સુન્દરીમ્ ॥ ૭૦॥

નમ્રીભૂય કૃતાઞ્જલિપ્રકટિતપ્રેમપ્રસન્નાનને
મન્દં ગચ્છતિ સંનિધૌ સવિનયાત્સોત્કણ્ઠમોઘત્રયે ।
નાનામન્ત્રગણં તદર્થમખિલં તત્સાધનં તત્ફલં
વ્યાચક્ષાણમુદગ્રકાન્તિ કલયે યત્કિઞ્ચિદાદ્યં મહઃ ॥ ૭૧॥

તવ દહનસદૃક્ષૈરીક્ષણૈરેવ ચક્ષુ-
ર્નિખિલપશુજનાનાં ભીષયદ્ભીષણાસ્યમ્ ।
કૃતવસતિ પરેશપ્રેયસિ દ્વારિ નિત્યં
શરભમિથુનમુચ્ચૈર્ભક્તિયુક્તો નતોઽસ્મિ ॥ ૭૨॥

કલ્પાન્તે સરસૈકદાસમુદિતાનેકાર્કતુલ્યપ્રભાં
રત્નસ્તમ્ભનિબદ્ધકાઞ્ચનગુણસ્ફૂર્જદ્વિતાનોત્તમામ્ ।
કર્પૂરાગરુગર્ભવર્તિકલિકાપ્રાપ્તપ્રદીપાવલીં

શ્રીચક્રાકૃતિમુલ્લસન્મણિગણાં વન્દામહે વેદિકામ્ ॥ ૭૩॥

સ્વસ્થાનસ્થિતદેવતાગણવૃતે બિન્દૌ મુદા સ્થાપિતં
નાનારત્નવિરાજિહેમવિલસત્કાન્તિચ્છટાદુર્દિનમ્ ।
ચઞ્ચત્કૌસુમતૂલિકાસનયુતં કામેશ્વરાધિષ્ઠિતં
નિત્યાનન્દનિદાનમમ્બ સતતં વન્દે ચ સિંહાસનમ્ ॥ ૭૪॥

વદદ્ભિરભિતો મુદા જય જયેતિ વૃન્દારકૈઃ
કૃતાઞ્જલિપરમ્પરા વિદધતિ કૃતાર્થા દૃશા ।
અમન્દમણિમણ્ડલીખચિતહેમસિંહાસનં
સખીજનસમાવૃતં સમધિતિષ્ઠ દાક્ષાયણિ ॥ ૭૫॥

કર્પૂરાદિકવસ્તુજાતમખિલં સૌવર્ણભૃઙ્ગારકં
તામ્બૂલસ્ય કરણ્ડકં મણિમયં ચૈલાઞ્ચલં દર્પણમ્ ।
વિસ્ફૂર્જન્મણિપાદુકે ચ દધતીઃ સિંહાસનસ્યાભિત-
સ્તિષ્ઠન્તીઃ પરિચારિકાસ્તવ સદા વન્દામહે સુન્દરિ ॥ ૭૬॥

ત્વદમલવપુરુદ્યત્કાન્તિકલ્લોલજાલૈઃ
સ્ફુટમિવ દધતીભિર્બાહુવિક્ષેપલીલામ્ ।
મુહુરપિ ચ વિધૂતે ચામરગ્રાહિણીભિઃ
સિતકરકરશુભ્રે ચામરે ચાલયામિ ॥ ૭૭॥

પ્રાન્તસ્ફુરદ્વિમલમૌક્તિકગુચ્છજાલં
ચઞ્ચન્મહામણિવિચિત્રિતહેમદણ્ડમ્ ।
ઉદ્યત્સહસ્રકરમણ્ડલચારુ હેમ-
ચ્છત્રં મહેશમહિલે વિનિવેશયામિ ॥ ૭૮॥

ઉદ્યત્તાવકદેહકાન્તિપટલીસિન્દૂરપૂરપ્રભા-
શોણીભૂતમુદગ્રલોહિતમણિચ્છેદાનુકારિચ્છવિ ।
દૂરાદાદરનિર્મિતાઞ્જલિપુટૈરાલોકમાનં સુર-
વ્યૂહૈઃ કાઞ્ચનમાતપત્રમતુલં વન્દામહે સુન્દરમ્ ॥ ૭૯॥

સન્તુષ્ટાં પરમામૃતેન વિલસત્કામેશ્વરાઙ્કસ્થિતાં
પુષ્પૌઘૈરભિપૂજિતાં ભગવતીં ત્વાં વન્દમાના મુદા ।
સ્ફૂર્જત્તાવકદેહરશ્મિકલનાપ્રાપ્તસ્વરૂપાભિદાઃ
શ્રીચક્રાવરણસ્થિતાઃ સવિનયં વન્દામહે દેવતાઃ ॥ ૮૦॥

આધારશક્ત્યાદિકમાકલય્ય
 મધ્યે સમસ્તાધિકયોગિનીં ચ ।
મિત્રેશનાથાદિકમત્ર નાથ-
 ચતુષ્ટયં શૈલસુતે નતોઽસ્મિ ॥ ૮૧॥

ત્રિપુરાસુધાર્ણવાસન-
 મારભ્ય ત્રિપુરમાલિની યાવત્ ।
આવરણાષ્ટકસંસ્થિત-
 માસનષટ્કં નમામિ પરમેશિ ॥ ૮૨॥

ઈશાને ગણપં સ્મરામિ વિચરદ્વિઘ્નાન્ધકારચ્છિદં
 વાયવ્યે વટુકં ચ કજ્જલરુચિં વ્યાલોપવીતાન્વિતમ્ ।
નૈરૃત્યે મહિષાસુરપ્રમથિનીં દુર્ગાં ચ સમ્પૂજય-
 ન્નાગ્નેયેઽખિલભક્તરક્ષણપરં ક્ષેત્રાધિ નાથં ભજે ॥ ૮૩॥

ઉડ્યાનજાલન્ધરકામરૂપ-
 પીઠાનિમાન્પૂર્ણગિરિપ્રસક્તાન્ ।
ત્રિકોણદક્ષાગ્રિમસવ્યભાગ-
 મધ્યસ્થિતાન્સિદ્ધિકરાન્નમામિ ॥ ૮૪॥

લોકેશઃ પૃથિવીપતિર્નિગદિતો વિષ્ણુર્જલાનાં પ્રભુ-
 સ્તેજોનાથ ઉમાપતિશ્ચ મરુતામીશસ્તથા ચેશ્વરઃ ।
આકાશાધિપતિઃ સદાશિવ ઇતિ પ્રેતાભિધામાગતા-
 નેતાંશ્ચક્રબહિઃસ્થિતાન્સુરગણાન્વન્દામહે સાદરમ્ ॥ ૮૫॥

તારાનાથકલાપ્રવેશનિગમવ્યાજાદ્ગતાસુપ્રથં
 ત્રૈલોક્યે તિથિષુ પ્રવર્તિતકલાકાષ્ઠાદિકાલક્રમમ્ ।
રત્નાલઙ્કૃતિચિત્રવસ્ત્રલલિતં કામેશ્વરીપૂર્વકં
 નિત્યાષોડશકં નમામિ લસિતં ચક્રાત્મનોરન્તરે ॥ ૮૬॥

હૃદિ ભાવિતદૈવતં પ્રયત્ના-
 ભ્યુપદેશાનુગૃહીતભક્તસઙ્ઘમ્ ।
સ્વગુરુક્રમસંજ્ઞચક્રરાજ-
 સ્થિતમોઘત્રયમાનતોઽસ્મિ મૂર્ધ્ના ॥ ૮૭॥

હૃદયમથ શિરઃ શિખાખિલાદ્યે
 કવચમથો નયનત્રયં ચ દેવિ ।

મુનિજનપરિચિન્તિત તથાસ્ત્રં
 સ્ફુરતુ સદા હૃદયે ષડઙ્ગમેતત્ ॥ ૮૮॥

ત્રૈલોક્યમોહનમિતિ પ્રથિતે તુ ચક્રે
 ચઞ્ચદ્વિભૂષણગણત્રિપુરાધિવાસે ।
રેખાત્રયે સ્થિતવતીરણિમાદિસિદ્ધી-
 ર્મુદ્રા નમામિ સતતં પ્રકટાભિધાસ્તાઃ ॥ ૮૯॥

સર્વાશાપરિપૂરકે વસુદલદ્વન્દ્વેન વિભ્રાજિતે
 વિસ્ફૂર્જન્ત્રિપુરેશ્વરીનિવસતૌ ચક્રે સ્થિતા નિત્યશઃ ।
કામાકર્ષણિકાદયો મણિગણભ્રાજિષ્ણુદિવ્યામ્બરા
 યોગિન્યઃ પ્રદિશન્તુ કાઙ્ક્ષિતફલં વિખ્યાતગુપ્તાભિધાઃ ॥ ૯૦॥

મહેશિ વસુભિર્દલૈર્લસતિ સર્વસંક્ષોભણે
 વિભૂષણગણસ્ફુરન્ત્રિપુરસુન્દરીસદ્મનિ ।
અનઙ્ગકુસુમાદયો વિવિધભૂષણોદ્ભાસિતા
 દિશન્તુ મમ કાઙ્ક્ષિતં તનુતરાશ્ચ ગુપ્તાભિધાઃ ॥ ૯૧॥

લસદ્યુગદૃશારકે સ્ફુરતિ સર્વસૌભાગ્યદે
 શુભાભરણભૂષિતત્રિપુરવાસિનીમન્દિરે ।
સ્થિતા દધતુ મઙ્ગલં સુભગસર્વસંક્ષોભિણી-
 મુખાઃ સકલસિદ્ધયો વિદિતસમ્પ્રદાયાભિધાઃ ॥ ૯૨॥

બહિર્દશારે સર્વાર્થસાધકે ત્રિપુરાશ્રયાઃ ।
કુલકૌલાભિધાઃ પાન્તુ સર્વસિદ્ધિપ્રદાયિકાઃ ॥ ૯૩॥

અન્તઃશોભિદશારકેઽતિલલિતે સર્વાદિરક્ષાકરે
 માલિન્યા ત્રિપુરાદ્યયા વિરચિતાવાસે સ્થિતં નિત્યશઃ ।
નાનારત્નવિભૂષણં મણિગણભ્રાજિષ્ણુ દિવ્યામ્બરં
 સર્વજ્ઞાદિકશક્તિવૃન્દમનિશં વન્દે નિગર્ભાભિધમ્ ॥ ૯૪॥

સર્વરોગહરેઽષ્ટારે ત્રિપુરાસિદ્ધયાન્વિતે ।
રહસ્યયોગિનીર્નિત્યં વશિન્યાદ્યા નમામ્યહમ્ ॥ ૯૫॥

ચૂતાશોકવિકાસિકેતકરજઃપ્રોદ્ભાસિનીલામ્બુજ-
 પ્રસ્ફૂર્જન્નવમલ્લિકાસમુદિતૈઃ પુષ્પૈઃ શરાન્નિર્મિતાન્ ।
રમ્યં પુષ્પશરાસનં સુલલિતં પાશં તથા ચાઙ્કુશં

વન્દે તાવકમાયુધં પરશિવે ચક્રાન્તરાલેસ્થિતમ્ ॥ ૯૬॥

ત્રિકોણ ઉદિતપ્રભે જગતિ સર્વસિદ્ધિપ્રદે
યુતે ત્રિપુરયામ્બયા સ્થિતવતી ચ કામેશ્વરી ।
તનોતુ મમ મઙ્ગલં સકલશર્મ વજ્રેશ્વરી
કરોતુ ભગમાલિની સ્ફુરતુ મામકે ચેતસિ ॥ ૯૭॥

સર્વાનન્દમયે સમસ્તજગતામાકાઙ્ક્ષિતે બૈન્દવે
ભૈરવ્યા ત્રિપુરાદ્યયા વિરચિતાવાસે સ્થિતા સુન્દરી ।
આનન્દોલ્લસિતેક્ષણા મણિગણભ્રાજિષ્ણુભૂષામ્બરા
વિસ્ફૂર્જદ્વદના પરાપરરહઃ સ માં પાતુ યોગિની ॥ ૯૮॥

ઉલ્લસત્કનકકાન્તિભાસુરં
સૌરભસ્ફુરણવાસિતામ્બરમ્ ।
દૂરતઃ પરિહૃતં મધુવ્રતૈ-
ર્રર્પયામિ તવ દેવિ ચમ્પકમ્ ॥ ૯૯॥

વૈરમુદ્ધતમપાસ્ય શમ્ભુના
મસ્તકે વિનિહિતં કલાચ્છલાત્ ।
ગન્ધલુબ્ધમધુપાશ્રિતં સદા
કેતકીકુસુમમર્પયામિ તે ॥ ૧૦૦॥

ચૂર્ણીકૃતં દ્રાગિવ પદ્મજેન
ત્વદાનનસ્પર્ધિસુધાંશુબિમ્બમ્ ।
સમર્પયામિ સ્ફુટમઞ્જલિસ્થં
વિકાસિજાતીકુસુમોત્કરં તે ॥ ૧૦૧॥

અગરુબહલધૂપાજસ્રસૌરભ્યરમ્યાં
મરકતમણિરાજીરાજિહારિસ્રગાભામ્ ।
દિશિ વિદિશિ વિસરદ્ગન્ધલુબ્ધાલિમાલાં
વકુલકુસુમમાલાં કણ્ઠપીઠેઽર્પયામિ ॥ ૧૦૨॥

ઈઙ્કારોર્ધ્વગબિન્દુરાનનમધોબિન્દુદ્વયં ચ સ્તનૌ
ત્રૈલોક્યે ગુરુગમ્યમેતદખિલં હાર્દં ચ રેખાત્મકમ્ ।
ઇત્થં કામકલાત્મિકાં ભગવતીમન્તઃ સમારાધય-
ન્નાનન્દામ્બુધિમજ્જને પ્રલભતામાનન્દથું સજ્જનઃ ॥ ૧૦૩॥

ધૂપં તેऽગરુસંભવં ભગવતિ પ્રોલ્લાસિગન્ધોદ્ધુરં
    દીપં ચૈવ નિવેદયામિ મહસા હાર્દાન્ધકારચ્છિદમ્ ।
રજસ્વર્ણવિનિર્મિતેષુ પરિતઃ પાત્રેષુ સંસ્થાપિતં
    નૈવેદ્યં વિનિવેદયામિ પરમાનન્દાત્મિકે સુન્દરિ ॥ ૧૦૪॥

જાતીકોરકતુલ્યમોદનમિદં સૌવર્ણપાત્રે સ્થિતં
    શુદ્ધાન્નં શુચિ મુદ્ગમાષચણકોદ્ભૂતાતથા સૂપકાઃ ।
પ્રાજ્યં માહિષમાજ્યમુત્તમમિદં હૈવંગવીનં પૃથ-
    ક્પાત્રેષુ પ્રતિપાદિતં પરશિવે તત્સર્વમઙ્ગીકુરુ ॥ ૧૦૫॥

શિમ્બીસૂરણશાકબિમ્બબૃહતીકૂશ્માણ્ડકોશાતકી-
    વૃન્તાકાનિ પટોલકાનિ મૃદુના સંસાધિતાન્યગ્નિના ।
સમ્પન્નાનિ ચ વેસવારવિસરૈર્દિવ્યાનિ ભક્ત્યા કૃતા-
    ન્યગ્રે તે વિનિવેદયામિ ગિરિજે સૌવર્ણપાત્રવ્રજે ॥ ૧૦૬॥

નિમ્બૂકાર્દ્રકચૂતકન્દકદલીકૌશાતકીકર્કટી-
    ધાત્રીબિલ્વકરીરકૈર્વિરચિતાન્યાનન્દચિદ્વિગ્રહે ।
રાજીભિઃ કટુતૈલસૈન્ધવહરિદ્રાભિઃ સ્થિતાન્પાતયે
    સંધાનાનિ નિવેદયામિ ગિરિજે ભૂરિપ્રકારાણિ તે ॥ ૧૦૭॥

સિતયાઞ્ચિતલડ્ડુકવ્રજા-
    ન્મૃદુપૂપાન્મૃદુલાશ્ચ પૂરિકાઃ ।
પરમાન્નમિદં ચ પાર્વતિ
    પ્રણયેન પ્રતિપાદયામિ તે ॥ ૧૦૮॥

દિગ્ધમેતદનલે સુસાધિતં
    ચન્દ્રમણ્ડલનિભં તથા દધિ ।
ફાણિતં શિખરિણીં સિતાસિતાં
    સર્વમમ્બ વિનિવેદયામિ તે ॥ ૧૦૯॥

અગ્રે તે વિનિવેદ્ય સર્વમમિતં નૈવેદ્યમઙ્ગીકૃતં
    જ્ઞાત્વા તત્ત્વચતુષ્ટયં પ્રથમતો મન્યે સુતૃપ્તાં તતઃ ।
દેવીં ત્વાં પરિશિષ્ટમમ્બ કનકામત્રેષુ સંસ્થાપિતં
    શક્તિભ્યઃ સમુપાહારામિ સકલં દેવેશિ શમ્ભુપ્રિયે ॥ ૧૧૦॥

વામેન સ્વર્ણપાત્રીમનુપમપરમાન્નેન પૂર્ણાં દધાના-
    મન્યેન સ્વર્ણદર્વીં નિજજનહૃદયાભીષ્ટદાં ધારયન્તીમ્ ।

સિન્દૂરારક્તવસ્ત્રાં વિવિધમણિલસદ્ભૂષણાં મેચકાઙ્ગીં
તિષ્ઠન્તીમગ્રતસ્તે મધુમદમુદિતામન્નપૂર્ણાં નમામિ ॥ ૧૧૧॥

પઙ્ક્ત્યોપવિષ્ટાન્પરિતસ્તુ ચક્રં
શક્ત્યા સ્વયાલિઙ્ગિતવામભાગાન્ ।
સર્વોપચારૈઃ પરિપૂજ્ય ભક્ત્યા
તવામ્બિકે પારિષદાન્નમામિ ॥ ૧૧૨॥

પરમામૃતમત્તસુન્દરી-
ગણમધ્યસ્થિતમર્કભાસુરમ્ ।
પરમામૃતઘૂર્ણિતેક્ષણં
કિમપિ જ્યોતિરુપાસ્મહે પરમ્ ॥ ૧૧૩॥

દૃશ્યતે તવ મુખામ્બુજં શિવે
શ્રૂયતે સ્ફુટમનાહતધ્વનિઃ ।
અર્ચને તવ ગિરામગોચરે
ન પ્રયાતિ વિષયાન્તરં મનઃ ॥ ૧૧૪॥

ત્વન્મુખામ્બુજવિલોકનોલ્લસ-
ત્પ્રેમનિશ્ચલવિલોચનદ્વયીમ્ ।
ઉન્મનીમુપગતાં સભામિમાં
ભાવયામિ પરમેશિ તાવકીમ્ ॥ ૧૧૫॥

ચક્ષુઃ પશ્યતુ નેહ કિંચન પરં ઘ્રાણં ન વા જિઘ્રતુ
શ્રોત્રં હન્ત શ્રુણોતુ ન ત્વગપિ ન સ્પર્શં સમાલમ્બતામ્ ।
જિહ્વા વેત્તુ ન વા રસં મમ પરં યુષ્મત્સ્વરૂપામૃતે
નિત્યાનન્દવિઘૂર્ણમાનનયને નિત્યં મનો મજ્જતુ ॥ ૧૧૬॥

યસ્ત્વાં પશ્યતિ પાર્વતિ પ્રતિદિનં ધ્યાનેન તેજોમયીં
મન્યે સુન્દરિ તત્ત્વમેતદખિલં વેદેષુ નિષ્ઠાં ગતમ્ ।
યસ્તસ્મિન્સમયે તવાર્ચનવિધાવાનન્દસાન્દ્રાશયો
યાતોઽહં તદભિન્નતાં પરશિવે સોઽયં પ્રસાદસ્તવ ॥ ૧૧૭॥

ગણાધિનાથં વટુકં ચ યોગિનીઃ
ક્ષેત્રાધિનાથં ચ વિદિક્ચતુષ્ટયે ।
સર્વોપચારૈઃ પરિપૂજ્ય ભક્તિતો
નિવેદયામો બલિમુક્તયુક્તિભિઃ ॥ ૧૧૮॥

વીણામુપાન્તે ખલુ વાદયન્ત્યૈ
　　નિવેદ્ય શેષં ખલુ શેષિકાયૈ ।
સૌવર્ણભૃઙ્ગારવિનિર્ગતેન
　　જલેન શુદ્ધાચમનં વિધેહિ ॥ ૧૧૯॥

તામ્બૂલં વિનિવેદયામિ વિલસત્કર્પૂરકસ્તૂરિકા-
　　જાતીપૂગલવઙ્ગચૂર્ણખદિરૈર્ભક્ત્યા સમુલ્લાસિતમ્ ।
સ્ફૂર્જદ્રત્નસમુદ્ગકપ્રણિહિતં સૌવર્ણપાત્રે સ્થિતૈ-
　　ર્દીપૈરુજ્જ્વલમાન્નચૂર્ણરચિતૈરારાર્તિકં ગૃહ્યતામ્ ॥ ૧૨૦॥

કાચિદ્ગાયતિ કિંનરી કલપદં વાદ્યં દધાનોર્વશી
　　રમ્ભા નૃત્યતિ કેલિમઞ્જુલપદં માતઃ પુરસ્તાત્તવ ।
કૃત્યં પ્રોજ્ઝ્ય સુરસ્ત્રિયો મધુમદવ્યાઘૂર્ણમાનેક્ષણં
　　નિત્યાનન્દસુધામ્બુધિં તવ મુખં પશ્યન્તિ દૃશ્યન્તિ ચ ॥ ૧૨૧॥

તામ્બૂલોદ્ભાસિવક્ત્રૈસ્ત્વદમલવદનાલોકનોલ્લાસિનેત્રૈ-
　　શ્ચક્રસ્થૈઃ શક્તિસઙ્ઘૈઃ પરિહૃતવિષયાસઙ્ગમાકર્ણ્યમાનમ્ ॥ ૧૨૨॥

અર્ચાવિધૌ જ્ઞાનલવોઽપિ દૂરે
　　દૂરે તદાપાદકવસ્તુજાતમ્ ।
પ્રદક્ષિણીકૃત્ય તતોઽર્ચનં તે
　　પઞ્ચોપચારાત્મકમર્પયામિ ॥ ૧૨૩॥

યથેપ્સિતમનોગતપ્રકટિતોપચારાર્ચિતં
　　નિજાવરણદેવતાગણવૃતાં સુરેશસ્થિતામ્ ।
કૃતાઞ્જલિપુટો મુહુઃ કલિતભૂમિરષ્ટાઙ્ગકૈ-
　　ર્નમામિ ભગવત્યહં ત્રિપુરસુન્દરિ ત્રાહિ મામ્ ॥ ૧૨૪॥

વિજ્ઞપ્તીરવધેહિ મે સુમહતા યત્નેન તે સંનિધિં
　　પ્રાપ્તં મામિહ કાન્દિશીકમધુના માતર્ન દૂરીકુરુ ।
ચિત્તં ત્વત્પદભાવને વ્યભિચરેદ્દૃગ્વાક્ચ મે જાતુ ચે-
　　ત્તત્સૌમ્યે સ્વગુણૈર્બધાન ન યથા ભૂયો વિનિર્ગચ્છતિ ॥ ૧૨૫॥

ક્વાહં મન્દમતિઃ ક્વ ચેદમખિલૈરેકાન્તભક્તૈઃ સ્તુતં
　　ધ્યાતં દેવિ તથાપિ તે સ્વમનસા શ્રીપાદુકાપૂજનમ્ ।
કાદાચિત્કમદીયચિન્તનવિધૌ સન્તુષ્ટયા શર્મદં

સ્તોત્રં દેવતયા તયા પ્રકટિતં મન્યે મદીયાનને ॥ ૧૨૬॥

નિત્યાર્ચમિદં ચિત્તે ભાવ્યમાનં સદા મયા ।
નિબદ્ધં વિવિધૈઃ પદ્યૈરનુગૃહ્ણાતુ સુન્દરી ॥ ૧૨૭॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ ત્રિપુરસુન્દરીમાનસપૂજાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Sunder Hattangadi

---

*Tripurasundari Manasa Puja Stotra*
pdf was typeset on October 6, 2024

Please send corrections to *sanskrit@cheerful.com*